श्रीमद्भागवते पुराणलक्षणसङ्गतिविमर्शः

किशोरचन्द्रगौतमः

उपप्राध्यापकः, विश्वविद्यालयविद्यापीठम्, दाङ्गः

gautamkishor94@gmail.com

लेखसारः

आलेखेऽस्मिन् पुराणलक्षणस्य भागवते सङ्गतिः निरूपिता विद्यते। पुराणलक्षणमपि भागवते तथा पुराणान्तरेषु च पृथक् पृथक् विलोक्यते। 'अत्र सर्गो विसर्गश्च' इत्यादिरीत्या पुराणस्य दश लक्षणं श्रीमद्भागवते द्वितीयस्कन्धे प्रदर्शितम्। एवमेव द्वादशस्कन्धेऽपि दशलक्षणमेव प्रकटीकृतम्। परन्तु पुराणान्तरेषु 'सर्गश्च प्रतिसर्गश्च०' इत्यादि पञ्चलक्षणमेव व्याख्यातम्। सामान्यतया विषयोऽयं संशयावहोऽस्तीति तदेव प्रकाशयितुं विषयेऽस्मिन् प्रवृत्तिरावश्यकीति धियात्र आलेखोऽयं प्रवृत्तः। अनेन विश्लेषणेन तज्जिज्ञासूनां तद्विषयिणी पिपासा उपशाम्येदिति ते एव विषया अत्र प्रस्तुता विद्यन्ते।

प्रमुखशब्दाः

अन्वयः, आश्रयः, ईशानुकथा, ऊतिः, वंशानुचरितम्।

विषयपरिचयः

श्रीमद्भागवतमष्टादशपुराणेषु श्रेष्ठं मन्यते। रचनादृष्ट्या कनिष्ठमपि महत्त्वदृष्ट्या ज्येष्ठं प्रेष्ठं वरिष्ठञ्च वरीवर्ति। महर्षिवेदव्यासप्रणीतमिदं भागवतं न केवलं पौराणिकवाङ्मये अपितु निखिलेऽपि वाङ्मये प्रसिद्धं सर्वसम्मतं सर्वविदितञ्च वेविद्यते। अस्य रचनासन्दर्भे विदुषां मतवैविध्यं विद्यते। केचनार्वाचीना विद्वांसः पुराणमिदं वोपदेवस्य रचनारूपं निश्चिन्वन्ति परन्तु पुराणस्यास्य रचनाकारः कोऽपि स्यात् अवश्यमपि स ऋषिकल्पः महान् विद्वान् वेविद्यत इत्यत्र न कोऽपि संशीतिलेशः। तादृशं पुराणं सर्वेभ्यः पुराणेभ्यः स्वगुणगरिम्णा विभिद्यते पौराणिकवाङ्मये। श्रीमद्भागवते भगवत्तत्त्वप्रतिपादकस्य ज्ञानस्यैव 'भागवतम्' इति संज्ञा दृश्यते। सिसृक्षाविमूढः प्रजापतिर्ब्रह्मा कल्पादौ दुश्चरेण तपसा भगवन्तं नारायणमाराध्य तत्कृपया यज्ज्ञानमवाप्नोति, तदेव भागवतमिति संज्ञितं भवति। श्रीमद्भागवते तच्चतुर्षु श्लोकेष्वेवंरूपेणोपक्लृप्तं वर्तते –

अहमेवासमेवाग्रे नान्यद् यत् सदसत्परम्।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम्॥
ऋतेऽर्थं यत्प्रतीयेत न प्रलीयेत चात्मनि।
तद्विद्यादात्मनो मायां यथाभासो यथा तमः॥
यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम्॥
एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनाऽऽत्मनः।

अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा ॥ (श्रीमद्भा० २।९।३२-३५)

इदं ज्ञानमुपाश्रित्य भगवत्साधर्म्यमवाप्य प्रजापतिः पूर्वकल्पवत् स्थूलसूक्ष्मात्मकं स्थावजङ्गमात्मकं सृष्टिप्रलयात्मकं च विश्वमिदं ससर्ज। भगवत्प्रोक्तमिदं तत्त्वात्मकं भागवतं लब्ध्वा प्रजापतिरेवास्य पुराणविद्यास्वरूपं रचयति। अस्मिन्नेव काले लक्षणविन्यासोऽप्यत्र दृग्गोचरतामायाति, तद्यथा-

प्रजापतिर्धर्मपतिरेकदा नियमान्यमान्।
भद्रं प्रजानामन्विच्छन्नातिष्ठत् स्वार्थकाम्यया ॥
तं नारदः प्रियतमो रिक्थादानामनुव्रतः।
शुश्रूषमाणः शीलेन प्रश्रयेण दमेन च ॥
मायां विविदिषन् विष्णोर्मायेशस्य महामुनिः।
महाभागवतो राजन् पितरं पर्यतोषयत् ॥
देवर्षिः परिपप्रच्छ ....।
तस्मा इदं भागवतं पुराणं दशलक्षणम्।
प्रोक्तं भगवता प्राह प्रीतः पुत्राय भूतकृत् ॥ (तत्रैव- श्रीमद्भा०२।९।३९-४३)

पुनरग्रिमे श्रीमद्भागवतस्य द्वितीयस्कन्धस्य दशतमेऽध्याये भागवतस्य सर्गादिदशलक्षणानां वर्णनमेवं समुपलभ्यते –

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥ (श्रीमद्भा० २/१०/१)

इदानीं पुराणानां लक्षणानि उल्लिख्यास्मिन् आलेखे तदनुसारमेवास्मिन् श्रीमद्भागवते लक्षणानि सङ्गच्छन्ते न वेति विचार्यते।

अध्ययनविधिः

आलेखस्यास्य निष्पादनायावश्यकसामग्रीसङ्कलनाय च विशेषरूपेण पुस्तकालयीयाध्ययनविधिरेवात्राङ्गीकृतोऽस्ति। अध्ययनस्यास्य प्रमुखसामग्रीत्वेनोरीकृताः सन्ति। तुलनाप्रतितुलनादिविधिं स्वीकृत्य सञ्चितसामग्रीणामध्ययनात् यथायथं चिन्तनमनननिदिध्यासनादिविधयश्च स्वायत्तीकृता अभूवन्। क्वचित् गभीरविषयविचारसरणौ स्वोपज्ञपद्धतिश्चावलम्बिता वर्तते।

अध्ययनस्य प्रमुखाः समस्याः

प्रस्तोष्यमाणस्याध्ययनस्य मुख्यरूपेण निम्नाङ्किता एव समस्या विद्यते। यथा–

क) श्रीमद्भागवते पुराणलक्षणस्य सङ्गतिः कीदृशी ? इति।

अध्ययनस्योद्देश्यम्

वस्तुतः उक्तसमस्यायाः समाधानमेवाध्ययनस्यास्योद्देश्यमस्ति। सूत्ररूपेण विचारिते निम्नाङ्कितमेवोद्देश्यं दृश्यते –

क) श्रीमद्भागवते पुराणलक्षणसङ्गतिनिरूपणम्। इति।

अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

शोधलेखस्यास्य सम्पादनाय श्रीमद्भागवतम्, तत्सम्बद्धाः अन्ये ग्रन्थाश्च विचार्यन्त इति मुख्यरूपेण महर्षिद्वैपायनप्रणीतं श्रीमद्भागवतमेव क्षेत्रमस्ति। तत्रापि पुराणलक्षणानुसारं श्रीमद्भागवते सङ्गतिनिरूपणमेव मुख्यं क्षेत्रमस्ति। तदतिरिक्तविषयाणामनध्ययनमेवास्यालेखस्य सीमा विद्यते।

पुराणस्य लक्षणानि, श्रीमद्भागवते तेषां सङ्गतिश्च

सर्गः

भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहृतः।

ब्रह्मणो गुणवैषम्याद्.............. ॥ इति। (श्रीमद्भा० २।१०।३)

भगवत्प्रेरणया त्रिगुणात्मिकायां प्रकृतौ सत्त्वादित्रिगुणसंक्षोभादाकाशादिञ्चमहाभूतानाम्, शब्दादिपञ्चतन्मात्राणामिन्द्रियाहङ्करमहत्तत्त्वानां चोत्पत्तिरेव सर्गः। अर्थाद् भागवतस्य प्रथमलक्षणमस्ति, तत्कथमेकतत्त्वान्नानात्वमुद्भवतीति प्रश्नस्य समाधानम्, यतो वैविध्यस्य मूलानुसन्धानं कुर्वन्तो वयं 'नेति नेति' पद्धत्या तत्कारणभूतं ब्रह्मस्वरूपं विज्ञाय वीतशोका भवेम इति।

विसर्गः

पुरुषस्य (वासनाविशिष्टस्य) सृष्टिरेव विसर्गः, 'विसर्गः पौरुषः स्मृतः' इति लक्षणात् (श्रीमद्भा०२/१०/३)। अत्र पुरुषरूपेण हिरण्यगर्भ एव गृहीतः। तेन जीवानां वासनापरिणतिमवधार्य नानात्वरूपेण सृष्टिचक्रस्य यत्प्रवर्तनं क्रियते तदेव विसर्ग इति संज्ञया संज्ञितो भवति। प्रथमलक्षणं मूलतत्त्वस्यामूर्तिकारणानुसन्धानस्य, द्वितीयमिदं च विसर्गलक्षणमुक्तम्- कारणानुसन्धानस्य प्रक्रियां बोधयति। चराचरं सम्पूर्णमपि मूर्तिमज्जगत्, भगवत्स्वरूपमेवेति लक्षणस्यास्य पार्यन्तिकं तात्पर्यम्।

स्थानम्

"स्थितिर्वैकुण्ठविजयः" प्रतिक्षणं विनाशमुपगच्छन्तीं संसृतिमिमां यो धारयति यश्च मर्यादायामुपबध्नाति, तत्सर्वकारणकारणस्याकुण्ठस्वरूपस्य परमेश्वरस्य माहात्म्यनिरूपणमेव स्थितिः। तात्पर्यमस्ति यदसत्यभूते नानात्वप्रपञ्चमूले जगति सत्यभूता एकैव भगवत्सत्ता वर्तते। ययैवेदं सर्वमसत्यमपि सत्यरूपेणोपकल्पितं स्वशक्त्या धृतञ्च। अत एव नानाऽवस्थासु तदेकस्येवानुव्याप्तिः स्थानमिति सिद्ध्यति।

पोषणम्

"पोषणं तदनुग्रहः" इति जीवानामुपरि भगवत्कृपावर्षणमेव पोषणम्। भगवत्कृपैव जीवस्य मुमुक्षामुद्बोधयति, सैव च तं परमसुखेनोपबध्नाति। यतः सा तमखिलसच्चिदानन्दसुधासारेण पुष्णाति, अतो भगवत्कृपैव भागवते पोषणाभिधानेनोपलक्षिता भवति। लक्षणेनानेन भगवदनुग्रहप्रतिपादककथानामवश्यम्भाविता भागवते सिद्ध्यति, येन साधारणा हतोत्साहा अपि जना भगवदाभिमुख्यं प्राप्नुयुरिति।

ऊतिः

प्रश्नोऽयमुदेति यदीदृशी भगवत्कृपा सर्वदैव जीवानामुपरि यदि वर्तत एव, तत्कथं ते संसारदावानले दग्धीभूताः क्लिश्यन्ते, कथं वा सहसैव निरामयं भगवद्धाम न प्रविशन्तीति ? तदस्य समाधानमिदं लक्षणं कुरुते "ऊतयः कर्मवासनाः" इति (श्रीमद्भा० २।१०।४)। जीवानां स्वकर्मवासना एव 'ऊतयः'। याभिर्भगवदंशभूतोऽपि स बलात्

पृथक्कृतः। अत एव जीवगतवासनाविपाकस्य तन्निरोधस्य च निरूपणं भागवतस्य यल्लक्षणं करोति, तद् 'ऊतिः' इति शब्देन समुच्चार्यते।

मन्वन्तरम्

"मन्वन्तराणि सद्धर्मः" इति सर्गस्य यत्कालविशेषे मनुः, तत्पुत्राः, इन्द्रः सप्तर्षयश्च भगवद्भक्तिप्रतिपादकान् धर्मविशेषानाचरन्ति, स्वकीयाचरणेन तत्कालवर्तिजनानां धर्मभावनां शास्त्रदिशा परिशोधयन्ति, तत्कालविशेषस्य धर्मविशेषस्य च वर्णनमेव मन्वन्तरम्। एतेनाधिकारिभेदमुपलक्ष्य तत्तन्मन्वन्तराणां भगवत्प्राप्तिसाधनप्रणाली निर्दिश्यते, येन जनाः स्वरुचिमधिकारक्षमतां चाभिलक्ष्य स्ववर्त्मग्रहणे सक्षमाः स्युः।

ईशानुकथा

अवतारानुचरितं हरेश्चास्यानुवर्तनाम्।

सतामीशकथाः प्रोक्ता नानाऽऽख्यानोपबृंहिताः॥ (श्रीमद्भा० २।१०।५)

सृष्टिप्रलयचक्रे सततं भ्राम्यमाणानां जीवानां कल्याणाय भगवतो नामरूपलीलाधामोपबृंहिता या अववतारलीलास्तत्पार्षदानामपि च यच्चरितानि भवन्ति, तानि सर्वाण्यपि समुदितधिया लक्षणेऽस्मिन्नन्तर्भवन्ति। भगवच्चरितनिषेवणात्तत्प्रीतिर्भवति, प्रीत्यैव जनार्दनस्तुष्यति, तस्य तोषणमेव जीवस्य परमपुरुषार्थसाधनमिति भागवतस्य सप्तमेऽस्मिन् लक्षणे भगवच्चरितप्राधान्यमेव विवक्षितमिति।

निरोधः

"निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः।" (श्रीमद्भा०२।१०।६) लक्षणस्यास्य प्रसङ्गतो विविधा अर्थाः सम्भवन्ति। प्रत्नानामाचार्याणां व्याख्यासरणिमाश्रित्य केचनात्र निर्दिश्यन्ते, तद्यथा –

(१) भगवदतिरिक्तं सर्वमपि स्थावरजङ्गमात्मकं जगत् प्रलयात्मकमेव। अतस्तस्य नैमित्तिकादिप्रलयसंस्थानां वर्णनम्, परमेश्वरस्य च सत्तारूपेणावशिष्टत्वमेव निरोधः (वल्लभाचार्य, सन् १९११, पृ. २१०)। यद्वा-

(२) आत्मनो जाग्रत्स्वप्नसुषुप्त्यादिविरहितं तुरीये परमात्मनि शयनमेव निरोधः(श्रीमद्भा० २/१०/६)।

अथवा-

(३) लोकत्रासहेतुकानामसुराणां दुष्टभूभुजां च भगवत्कर्तृकदमनमेव निरोधः (वल्लभाचार्य, सन् १९११, पृ. २११)।

(४) भगवत्कथामाधुरीप्रवर्षणेन जीवगताज्ञानकटुकषायवासनाविपाकनिरसनमेव निरोध इति गोस्वामिविठ्ठलनाथदीक्षितमहाशयाः (वल्लभाचार्य, सन् १९११, पृ. २)।

मुक्तिः

अज्ञानकल्पितकर्तृत्वभोक्तृत्वादीन् अनात्मभावान् परित्यज्यात्मनः स्वरूपावस्थानमेव मुक्तिलक्षणस्य विषयः-

मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः (श्रीमद्भा० २।१०।६)।

आश्रयः

भागवतस्येदं दशमं लक्षणं महत्त्वपूर्णलक्षणमस्ति। अस्य शुद्ध्यर्थं स्पष्टीकरणार्थमेव नवानां लक्षणानां प्रवृत्तिर्भवति - *दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम्॥* (२।१०।३) जडजङ्गमात्मकस्य विश्वस्यौत्पत्तिकमुपसंहारात्मकं चोभयविधस्वरूपं यस्मिन् प्रतीयते स एवाश्रयः परं ब्रह्म परमात्मेत्ति च शब्द्यते। अतस्तस्य प्राधान्येन वर्णनं यस्मिन् लक्षणे भवति, तदन्वर्थतया 'आश्रयः' इति निगद्यते। यथा-

आभासश्च निरोधश्च यतश्चाध्यवसीयते।

स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥ (श्रीमद्भा०-२।१०।७)

इत्येवमेतानि भागवतस्य दश लक्षणानि व्याख्यातानि। अन्यत्रापि श्रीमद्भागवते पुराणानां दश लक्षणानि निगदितानि, यथा-

पुराणलक्षणं ब्रह्मन् ब्रह्मर्षिभिर्निरूपितम्।

शृणुष्व बुद्धिमाश्रित्य वेदशास्त्रानुसारतः॥

सर्वोऽस्याथ विसर्गश्च वृत्तीरक्षान्तराणि च।

वंशो वंशानुचरितं संस्थाहेतुरपाश्रयः॥ (श्रीमद्भा०- १२।७/८-९)

यद्यपि पुराणानां पञ्च लक्षणान्येव बहुसम्मतानि, यतो विष्णुपुराणे (३०६/२४), मार्कण्डेयपुराणे (१३४।१३), अग्निपुराणे (११।१४), भविष्यत्पुराणे (२।५), ब्रह्मवैवर्त' वराह- स्कन्द-मत्स्य-कूर्म-ब्रह्माण्ड गरुड-शिवादि-पुराणेष्वपि पुराणलक्षणात्मकमयं श्लोकः किञ्चित् पाठान्तरेण प्रायः सर्वत्रैव समुपलभ्यते, तद्यथा-

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।

वंश्यानुचरितं चेति पुराणं पञ्चलक्षणम्॥ इति,

तथापि महदल्पव्यवस्थया पौराणिकानां मतान्तरेण च पुराणेषु दशलक्षणपद्धतिरपि सङ्गच्छत इति श्रीमद्भागवतस्यैव मतम्। ब्रह्मवैवर्तपुराणादिष्वपि महापुराणस्य दशलक्षणानि परिगृहीतानि। अन्यत्र श्रीमद्भागवतमपि 'महापुराणम्', 'क्षुल्लकपुराणम्' इति पुराणस्य द्विधाभेदमुपकल्प्य लक्षणसमन्वयेन प्रश्नस्यास्य समाधानं करोति। अतः प्रतीयते यद् दश लक्षणानि केवलं महापुराणानामेव भवन्ति, नोपपुराणानाम्, तेषामल्पविस्तरत्वाद्वर्णनलाघवाच्चेति। पुराणानां दश लक्षणान्यपि श्रीमद्भागवत एव द्वादशस्कन्धे सम्यक्तया व्याख्यातानि। तेषामप्यनुवादोऽस्माभिरत्र विधीयते, येन भागवतस्य दशलक्षणेभ्यस्तेषां भेदं वैशिष्ट्यं च प्रतिपादने सुकरं भविष्यति, तत्क्रमश एतेषामियं व्याख्या –

सर्गः

त्रिगुणात्मिकायां मूलप्रकृतौ गुणानां संक्षोभात् ततो महत्तत्त्वस्योद्भवः, पश्चात् त्रिविधाहङ्कारेण पञ्चतन्मात्रपञ्चमहाभूतानां समुत्पत्तिरेव सर्गः (श्रीमद्भा० १२/७/११)।

विसर्गः

परमेश्वरस्यानुग्रहेण प्रजापतिः सृष्टिसामर्थ्यमवाप्य महदादिभिः पूर्ववासनानुसारं बीजाद्बीजमिव चराचरोपाधिविशिष्टस्य जीवस्य यत्सृष्टिः कुरुते, तदेव विसर्ग इति कथ्यते (श्रीमद्भा० १२/७/१२)।

वृत्तिः

जीवानां जीवनधारणव्यवस्थाविधानमेव वृत्तिः। तद्यथा-

वृत्तिर्भूतानि भूतानां चराणामचराणि च।

कृतास्वेन नृणां तत्र कामाच्चोदनयाऽपि वा॥ इति। (श्रीमद्भा०१२।७।१३)

रक्षा

लक्षणस्यास्य सम्बन्धो भगवदवतारकथाभिः सह वर्तते। भगवान् युगे युगे तिर्यङ्मर्त्यदेवादिलीलारूपाणि विधाय, त्रयीधर्मविरोधिनां वधं वैदिकधर्मस्य च पुनरुद्धारं करोति; तदियमेव भगवत्कर्म रक्षेति व्यपदिश्यते (श्रीमद्भा० १२।७।१४)।

अन्तराणि

मनुर्देवाः, मनुपुत्राः, इन्द्रः, सप्तर्षयो भगवदंशावताराश्च इमे सर्वे मिलित्वा यत्कालमुपभुञ्जन्ते तन्नियमनं च कुर्वन्ति, तदेवान्तरं मन्वन्तरमित्ति वाऽभिधीयते, यथा-

मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः ।
ऋषयोऽशांवतारश्च हरेः षड्विधमुच्यते ॥ इति । (श्रीमद्भा०१२।७।१५)

वंशः

ब्रह्मपरम्पराप्रसूतानां सूर्यचन्द्रादिवंश्यानां राज्ञां त्रैकालिकान्वयनिरूपणमेव वंशः(श्रीमद्भा० १२।७।१६) ।

वंशानुचरितम्

तद्वंशधराणां वृत्तवर्णनमेव वंशानुचरितम्, यथा-
वंशानुचरितं तेषां वृत्तं वंशधराश्च ये । (श्रीमद्भा० १२/७।१६) इति ।

संस्था

नैमित्तिकादिचतुर्धाप्रलयनिरूपणं संस्था, यथा –

नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः ।
संस्थेति कविभिः प्रोक्ता चतुर्धाऽस्य स्वभावतः ॥ (तत्रैव-१७ तमः श्लोकः) इति ।

हेतुः

जीवनिरूपणं हेतुः । यथोक्तं तत्रैवाष्टादशे श्लोके –

हेतुर्जीवस्य सर्गादेरविद्याकर्मकारकः ।
तं चानुशयनं प्राहुरव्याकृतमुतापरे ॥(श्रीमद्भा० १२/७/१८) इति ।

अपाश्रयः

जाग्रत्स्वप्नसुषुप्त्यादिवृत्तित्रये, साक्षिरूपमधिष्ठानात्मकं यत्तुरीयं तत्त्वम्, तदेवापाश्रयः। लक्षणेऽस्मिन् तस्यैव परिशुद्धिर्भवति (श्रीमद्भा० १२/७/१९)। इत्येवं पुराणानां दश लक्षणान्यपि कथितानि। लक्षणदशकमिदं कस्यचिदपि महापुराणस्य (क्षुल्लकव्यतिरिक्तस्य) सम्भवति। श्रीमद्भागवतानुसारेण लक्षणसमवायस्यास्य अष्टादशेष्वपि पुराणेषु व्याप्तिर्निश्चप्रचमेव, तेषां महापुराणत्वाद्, अन्यद्वाष्टादशोपपुराणप्राप्तित्वाच्चेति, यथा-

एवं लक्षणलक्ष्याणि पुराणानि पुराविदः ।
मुनयोऽष्टादश प्राहुः क्षुल्लकानि महान्ति च ॥
ब्राह्मं पाद्मं वैष्णवं च शैवं लैङ्गं सगारुडम् ।
नारदीयं भागवतमाग्नेयं स्कान्दसंज्ञितम् ॥
भविष्यं ब्रह्मवैवर्तं मार्कण्डेयं सवामनम् ।
वाराहं मात्स्यकौर्मं च ब्रह्माण्डाख्यमिति त्रिषट् ॥ (श्रीमद्भा० १२।७।२२-२४)

अत एव नूनं भागवतमपि (अष्टादशमहापुराणानामन्तर्भावितत्वाद्) एभिर्दशलक्षणैर्लक्षयितुं शक्यते। एतेषां लक्षणानां व्याप्तिरस्मिन्नपि वर्तते, यत इदमपि महापुराणपदवीमनुगतमेवेति। किन्तु पूर्वमेवाभिलक्षितमस्माभियद् भागवतकारः पुराणदशलक्षणव्यतिरिक्तम् 'भागवतपुराणस्य' पृथग् दश लक्षणानि स्वीकरोति; यतः "अत्र सर्गो विसर्गश्च" इत्यस्मिन् श्लोके 'अत्र'शब्दः प्रक्रान्तस्य भागवतस्यैवाध्याहारं करोति, न सामान्यस्य कस्यचिदपि पुराणस्येति

प्रसङ्गमिमं सूक्ष्मधियाऽऽकलय्य सुतरां वेत्तुं शक्यते। पण्डितबलदेवोपाध्यायसदृशाः पुराणविषयकग्रन्थकारा एतयोर्लक्षणयोर्मध्ये भेदं नाङ्गीकुर्वन्ति। उभयमपि लक्षणसमुदायमिमे नाम पार्थक्याद्भिन्नं वस्तुतोऽभिन्नमेव मन्यन्ते (बलदेवोपाध्याय, २०२१, पृ. १२४-१३७)। परस्परतुलनात्मकधियाऽध्ययनं विधाय एभिः पुराणदशलक्षणैः साकं भागवतदशलक्षणानामपि सङ्गतिः समुपकल्पिता। परन्तु कार्येऽस्मिन् यत्क्रमविपर्ययः कष्टकल्पना च प्रतिभाति, तत्सत्यमपि क्वचिदर्थसाम्ये पुराणदशलक्षणेभ्यो भागवतस्य दशलक्षणानि स्फुटतया विशिनष्टि।

वस्तुतः पुराणमुनिर्महर्षिः कृष्णद्वैपायनः श्रीमद्भागवतस्य रचनायाम्, अन्यत्पुराणवाङ्मयरचनातः किमप्यनिर्वचनीयमेव वैशिष्ट्यमावहति; यतोऽन्येषु पुराणेषु तस्य सङ्कलसंग्रथनचातुरीमेव सरलातिसरलानुष्टुब्बहुलछन्दःप्रबन्धेन सर्वत्र वरीवर्ति। तेष्वखिलेष्वपि पुराणेषु प्रत्नसंवादानामविकलरूपेण संग्रथनपारतन्त्र्याद् वर्णाश्रमाचारादिलोकधर्ममहिम्ना तत्सुलभकरणोद्देश्याच्चेति, न तत्र तस्य निर्भरहृदयतरङ्गिणी स्वच्छन्दतया समुद्वेल्लितुं शक्यते; न वा ब्रह्मसूत्रसादृश्यगर्भा दार्शनिकी तस्य भाषाऽपि स्वीयगभीरत्वं श्लिष्टत्वं चोद्भासयितुमवसरमवाप्नोति; न तद्वन्नानाछन्दोविन्यासकोमला प्रभवति वर्णनोपक्रमे तस्य वाणी।तत्र तु, मुनिवर्यो व्यासः प्रामुख्येण सम्पादकरूपेणावस्थितो दृश्यते, अत एव सप्तदशपुराणविरचनानन्तरमपि तस्य हृदि तादृशी निवृतिर्नोद्भूता, यादृशी श्रीमद्भागवतरचनानन्तरमिति निव्यूढमेव स्फुटं शेमुषीजुषां विदुषां मनसीत्यलमतिपल्लवितेन।

श्रीमद्भागवतस्येदमेव वैशिष्ट्यमस्ति यदिदं सम्पादकव्यासस्य स्वीयं स्वान्तःसुखाय समुपकल्पितं काव्यमस्ति। यत्र विचारमूले लोकापेक्षया भगवत्तत्त्वस्यैव प्राधान्यं वर्तते, मानवधर्मस्यापेक्षया भागवतधर्मस्य महत्त्वमेव संराजते। सर्वरूपेण केवलं भगवानेव वर्णनविषयीक्रियते; लोकस्तु तदनन्तरमेव तत्क्रीडनकवदायाति, न पूर्वकृतमहाभारतादिग्रन्थेष्विव प्राधान्यमावहतीति। सार्वभौमसनातनधर्मस्य साधनक्षेत्रे प्रत्नकालादेव द्वे भावधारे युगपद्रूपेणायातः। प्रथमा तु मानवसौख्यापेक्षिका, तदुत्कर्षमूला पुरुषार्थप्रधाना 'मानवधर्मरूपा'; अपरा भगवन्मूला, तदनुग्रहविग्रहा, तत्नुसंधित्सापेक्षिका 'भागवतधर्मरूपा' चेति।

एकस्यां मुख्यो मानवोऽस्ति, अन्यस्यां श्रीभगवान् विद्यते। प्रथमायां यद्यपि मनुष्यो धर्मानाचरति, पुरुषार्थान् वितनोति, निखिलब्रह्माण्डभाण्डघटयित्रीं प्रकृतिदेवीमपि वशमानयति, ऐश्वर्यं प्राप्नोति सिद्धिमपि च विन्दति, परं शान्तिं नाधिगच्छति। क्वापि कदापि वा तस्य हृदि रसानन्दनिष्यन्दिनी भक्तिर्नोद्भवति। किमधिकं सर्वथाऽपूर्ण इव प्रतिभाति मानवोऽस्यां प्रथमधर्मधारायाम्। द्वितीयायां भागवतधर्मधारायां यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरो जनो भगवदनुग्रहभाजनीभूत्वा तदाज्ञापालनरूपकर्मान् निष्कामधिया समाचरन्नन्यान् बाह्यधर्मान् परित्यज्य मुक्तिभुक्तिस्पृहामपि च तिरस्कृत्य भगवत्प्रीत्यर्थमेव जीवनं धारयति, क्षणे क्षणे परमानन्दसुधामाधुरीमास्वादयति, तस्यामेवासकृदवगाहते, किञ्च पूर्णकाम एव भवति सर्वथेति (कल्याण, १९९४(वर्ष १६,सं३), पृ. ११७७-११८१)।

श्रीमद्भागवतमस्ति एतस्या द्वितीयधर्मधारायाः प्रतिपादको ग्रन्थः, अत एवैतस्मिन् निसर्गत एव भगवत्प्रेमप्रवाहपूर्णा नैष्कर्म्योपलब्धिः पराशान्तिश्च सूत्ररूपेण राराजते, मणिरूपेण लक्षणलक्षितपौराणिकस्वरूपं काव्यकलागुम्फमपि चात्र महर्षिवर्येणोपनिबद्धम्; यतोऽन्येभ्यः पुराणेभ्यः सूक्ष्मरूपेणेदं विशिष्टतरमस्ति, अत एव भाषाशैलीलक्षणविन्यासोऽप्यत्र इतरेभ्यो पृथक् चमत्कारकोटिमुपगतो दृश्यते। श्रीमद्भावगतस्य भाषां विद्वांसः "समाधिभाषा व्यासस्य" इति निगदन्ति। साहित्यिका अत्र 'नारिकेलपाकम्', 'आरभटीवृत्तिम्' चोन्मेषयन्ति, पौराणिकाः पृथग्रूपेणास्य लक्षणं रचयन्ति। यथा-

यत्राधिकृत्य गायत्री वर्ण्यते धर्मविस्तरः।

वृत्रासुरवधोपेतं तद्भागवतमिष्यते ।। (मत्स्यपुराणे)

अपि च,

अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः ।
गायत्रीभाव्यरूपोऽसौ वेदार्थपरिबृंहितः ।। (गरुडपुराणे)

श्रीमद्भागवतं स्वयमेवान्येभ्यः पुराणेभ्यः स्वकम् इतरलक्षणेभ्यश्च स्वीयलक्षणानि स्फुटरूपेण विशिनष्टीति पूर्वमेवालोचितमस्माभिः। एतावता द्वितीयस्कन्धे दशमेऽध्याये प्रोक्तानि भागवतस्य दशलक्षणानि एतस्मिन्नेव सङ्गच्छन्ते, नेतरेष्विति स्कन्धक्रमानुसारेणाध्ययनं कुर्वन्तोऽत्र वयं विशदं व्याकुर्मः ।

प्रथमः स्कन्धः (अधिकारस्कन्धः)

श्रीमद्भागवतस्य प्रथमं स्कन्धमाचार्याः 'अधिकारस्कन्धः' इति नाम्ना व्यपदिशन्ति। अतो दशलक्षणलक्षिते भागवते कीदृशोऽधिकारिणः स्युरित्यस्मिन्नेव स्कन्धे विभिन्नकथाप्रसङ्गेषु सुस्पष्टं भवति। अस्य धर्मस्य स एवाधिकारी यस्य हृदि प्राणिनां कृते सहजरूपेणैव कृपा भवति, यः खलु स्वापराधिनमपि जनं स्वविशालहृदयानुरोधेन क्षमादानं कर्तुं शक्नोति, भगवत्स्मरणकारिणीं विपत्तिमपि च सानन्दं स्वीकरोति। तत्सर्वमप्येतस्मिन् निदर्शिनीभूतं विद्यते, तद्यथा-

सप्तमेऽध्याये महाभागा द्रौपदी स्वपञ्चपुत्रहन्तारम्, धनञ्जयेन वशीकृतं वन्दिनम्, अश्वत्थामानं दृष्ट्वा करुणया निर्भिन्नहृदया तं नितरां क्षमादानं करोति, कथयति च यद् मादृशी हतपुत्रा एतस्य जननी गौतमी मा भवेदिति (श्रीमद्भा० १।७।४३)।

अष्टमेऽध्याये अभिमन्युप्रिया उत्तरा, अश्वत्थाम्ना प्रयुक्तेन ब्रह्मास्त्रेण पीडिता सती आर्तत्राणं श्रीगोविन्दमुपयाति, कथयति च "देव ! कुरुवंशस्य बीजरूपेणावशिष्टो मदीयो डिम्भः कुशलं तिष्ठेत्, कामं मामयं ब्रह्मास्त्रः प्रदहतु। न मे मृत्योर्भयः, किन्तु लोकहिताय गर्भस्थशिशुरयं मा म्रियेत"(श्रीमद्भा०१।८।१०) इति।

अस्मिन्नेव स्कन्धे धनञ्जयादिकानां जननी पृथा, श्रीकृष्णदर्शनकारणभूतं दुःखं कामयते। यतो दुःखेनैव वास्तविकभगवत्प्रपत्तिः सम्भवति, यया श्रीकृष्णस्तुष्यति मुक्तेरप्युत्कृष्टं स्वकीयं दर्शनं च ददाति (श्रीमद्भा० १।७।२५)।

एतदतिरिक्तं महाभागवतस्य भीष्मस्य, शरशय्यात्मके महत्कष्टे भगवत्स्तुतिः, तत्कृपालुतायाञ्च स्मरणम् (१।९।३२-४२), परीक्षितः शापप्राप्त्यनन्तरमपि निर्द्वन्द्वात्मिका भगवत्तत्त्वजिज्ञासा (१।१९) इत्यादि सर्वं भगवत्तत्त्वस्याधिकारिनिरूपणं करोति।

द्वितीयः स्कन्धः (साधनस्कन्धः)

यथाऽधिकारिनिरूपणादृते दशलक्षणात्मकेऽस्मिन् भागवते जनानां प्रवृत्तिरेव संशयापन्ना स्यात्, तथैव तत्साधननिरूपणाद्विनाऽपि परमतत्त्वस्याधिगमो दुष्प्राप्यः सम्भवेदिति विनिश्चित्य श्रीमद्भागवतरसिकाः स्कन्धमिमम् 'साधनस्कन्ध' इत्यभिधानेनालङ्कुर्वन्ति। अस्मिन् स्कन्धे दश अध्यायाः सन्ति। येषु भगवत्प्राप्तेस्त्रीणि साधनानि व्याख्यातानि। यथा-

भगवत्तत्त्वस्य ध्यानविधिः - प्रथमे द्वितीये चाध्याये।

हृदयनैर्मल्यम् - तृतीयचतुर्थेऽध्याये।

वैचारिकपराकाष्ठारूपमननम्-५-१० अध्यायेषु।

एतत्स्कन्धगतोऽयं श्लोको भागवतधर्मस्यभिप्रेतसाधनमेवं रूपेणोपदिशति-

तस्माद् भारत सर्वात्मा भगवान् हरिरीश्वरः ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताऽभयम् ॥ (२०११५) इति ।

तृतीयः स्कन्धः (सर्गस्कन्धः)

श्रीमद्भागवतस्य पूर्वोक्तौ द्वावपि स्कन्धौ दशलक्षणात्मकभागवततत्त्वस्य पीठिका रूपेणोपन्यस्तौ। वस्तुतस्तत्त्वात्मिका भगवच्चर्चा तु तृतीयस्कन्धादेव समारभ्यते। अस्मिन्नेव स्कन्धे भागवतस्य प्रथमं लक्षणम् (सर्गः) विस्तरेण व्याख्यातम्। तदनुसारेणैवास्यापि सर्ग इत्यभिधानमूरीकृतं विपश्चिद्भिः, यथा स्कन्धस्यास्य पञ्चमेऽध्याये 'विदुरमैत्रेयसंवाद'द्वारेण सृष्टेः क्रमो निरूप्यते। तदेषो द्वादशाध्यायपर्यन्तम्, अमूर्तसर्गरूपेणोपवर्ण्यते। पश्चात् प्रकृतेस्त्रिगुणात्मक स्वरूपस्य स्पष्टीकरणार्थं काश्चिद् गाथाः समाम्नाताः। षड्विंशे पुनः कपिलदेवहूतिसंवादरूपेण महत्तत्त्वादिभावानामुत्पत्त्यादिकथनेन 'सर्ग' एव व्याकृतः । निष्कर्षत इदं कथयितुं शक्यते यत्-

चतुर्दशाध्यायादारभ्य १९ अध्यायपर्यन्तं दितिकश्यपकथाव्याजेन तमः प्राधान्येन सृष्टिवर्णनमस्ति ।

दितिरूपायां तामसीप्रवृत्तौ यदा कश्यपरूपः सूत्रात्मा अनिच्छयैव संयुज्यते, तदा लोभात्मको हिरण्याक्षः "नास्तिकभावनाजन्यकोषाभिनिवेशात्मको हिरण्यकशिपुश्च", (राग- द्वेषाहङ्कारवशवर्ती यः स्वमीश्वरं मत्वाऽपि स्वर्णशय्यायामपि शान्तिं न प्राप्नोति) समुत्पद्यते ।

इमास्तामसीप्रवृत्तयः सर्गस्यावष्टम्भकरूपेण भवन्ति, अतस्त्वेतन्निरोधार्थं क्रमशो वराहस्य नृसिंहावतारस्य चावश्यकता भवति ।

भगवान् वराहः - दानरूपयज्ञप्रवृत्तेः सञ्चालकः। एतदवतारेण लोभात्मक. हिरण्याक्षदैत्यात् पृथिव्युद्धरणं भवति, लोके सृष्टिचक्रविधायिनी यज्ञपरम्परा च प्रचलिता भवति (श्रीमद्भा० ३।१३।३४-३९)।

भगवान् नृसिंहः - ब्रह्मसर्वात्मप्रवृत्तेः द्योतको नास्तिकप्रवृत्तेरुन्मूलयिता च। अत एतस्यावतरणेन 'सर्गमूले' सर्वरूपेण हरिरिति भागवतोक्तभावनायाः सञ्चारं भवति। यथा-

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः ।
अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम् ॥ (श्रीमद्भा० ७।८।१८) इति ।

एवं मनुकर्दमदेवहूतीत्यादिमनीषिणां कथाप्रसङ्गाः "रजः प्राधान्येन" सृष्टिवर्णनं कुर्वन्ति। यतः सर्गः समृद्ध्यर्थसञ्जातानां देवहूतितो नवकन्यानां समुत्पत्तिः, तासां विवाहादीनां कथा इत्येतत्सर्वं सृष्टिविस्तारमेव परिलक्षयति ।

अन्ते च २४ अध्यायादारभ्य ३३ पर्यन्तं भगवतः कपिलावतारवर्णनेन प्रकृतिपुरुषविवेकमूलकसत्त्वप्राधान्येन सृष्टेः सन्धारणं निगदितमिति प्रथमलक्षणमत्र सुष्ठुतयाऽनुस्यूतं दृश्यते ।

चतुर्थः स्कन्धः (विसर्गस्कन्धः)

पूर्वोक्तानुसारेणायमेव 'विसर्ग' शब्दस्य निःसृष्टार्थो यदेकस्मिन् ब्रह्माण्डभाण्डे प्रजापतिकृताया घटशरावादिवन्मूर्तिमयी पञ्चभूतात्मिकायाः सृष्टेर्वर्णनमिति। एतस्या आधारमस्ति, धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयम्। अतः स्कन्धेऽस्मिन् क्रमश एतस्यैव व्याख्यानं पृथक् पृथगध्ययेषु समुपकल्पितं वर्तते, यथा- सम्पूर्णेऽपि चतुर्थे स्कन्धे एकत्रिंशद् अध्यायाः सन्ति, येषु –

प्रथमसप्ताध्यायेषु - दक्षयज्ञवर्णनव्याजेन धर्मपुरुषार्थस्य निरूपणम्, तत्र 'शिव'तत्त्वस्त्यावमानना फलत्वेन यज्ञध्वंसरूपधर्मव्यपायः, पुनर्भगवत्प्रपत्तिद्वारेण तस्य धर्मस्य पूर्णतेति धर्म एव कथाभिः कथितः।

अनन्तरमष्टमाध्यायाद् द्वादशाध्यायपर्यन्तं ध्रुवकथामाध्यमेन, भगवदाश्रयादर्थस्य (पुरुषार्थस्य) निरूपणं तच्छुद्धिप्रतिपादनं च दृश्यते।

पुनः ११ अध्यायेषु - पृथुचरितं वर्ण्यते। यत्र पृथिव्या दोहनमित्यादिगाथाभिः 'काम' पुरुषार्थस्य विस्तारं तद्यज्ञमूलकत्वं च द्योतितम्।

अन्तिमेष्वष्टाध्यायेषु - 'प्राचीनबर्हिनारदसंवादेन, प्रचेतसां तपश्चर्यावर्णनेन, रुद्र- गीतेन, भगवद्दर्शननारदादिमुनीश्वराणामुपदेशवर्णनेन च मोक्षरूपश्चरमः पुरुषार्थः सम्यङ् निर्णीतः। अतो विसर्गात्मकपुरुषार्थचतुष्टयव्याख्यानादयमन्वर्थनामा चतुर्थो विसर्गस्कन्धः।

पञ्चमः स्कन्धः (स्थानस्कन्धः)

लक्षणानुसारेण भगवतो विष्णोस्ता मर्यादास्ते नियमा ये खलु सर्गस्यावस्थाने सहायका भवन्ति 'स्थान' पदेनात्र संगृह्यन्ते। पञ्चमेऽस्मिन् स्कन्धे त एव इदंरूपेणोपलभ्यन्ते, यथा-

भूगोलवर्णनम् - १६, १८, १९, २०, अध्यायेषु।

खगोलवर्णनम् - २१, २२, २३, आदिष्वध्यायेषु।

पातालवर्णनम् - २४-२५ आदिष्वध्यायेषु।

एतदतिरिक्तमपि सर्गधारणनियमाः प्रियव्रताग्नीध्रादिराज्ञां चरितेषु सूत्ररूपेण सङ्गुम्फिताः सन्ति। स्वाम्यखण्डानन्दसरस्वतीपादा आदितश्चतुर्विंशत्यध्यायेषु प्रकृतिजयम्, अन्तिमे चाध्याययुगले क्रमश ईश्वरस्य जीवस्य च विजयं स्वीकुर्वन्ति (अखण्डानन्द, सन् १९७१, पृ. ११७)। एवं लक्षणसङ्गतिरत्र नितरामुपपन्ना एव।

षष्ठः स्कन्धः (पोषणस्कन्धः)

स्कन्धस्यास्य प्रथमोऽयं प्रश्नो तत्कथं जीवो नरकाद्विमुच्यते ? यथा-

अधुनेह महाभाग यथैव नरकान्नरः।
नानोग्रयातनान्नेयात्तन्मे व्याख्यातुमर्हसि। (श्रीमद्भा० ६।१०६)

इमं समुत्तरितुं श्रीशुको विविधप्रायश्चित्तानुष्ठानानि विनिर्दिशति, पश्चात्सारभूतमिमं सिद्धान्तमुदीरयति –

न तथा ह्यघवान् राजन् पूयेत तप आदिभिः।
यथा कृष्णार्पितप्राणस्तत्पुरुषनिषेवया॥ (श्रीमद्भा० ६।१।१६) इति।

अनन्तरं सुस्पष्टतया वैयासकिरिदमपि स्वीयं मतं स्थापयति-

सकृन्मनः कृष्णपदारविन्दयोर्निवेशितं तद्गुणरागि यैरिह।
न ते यमं पाशभृतश्च तद्भटान् स्वप्नेऽपि पश्यन्ति हि चीर्णनिष्कृताः॥ (श्रीमद्भा० ६।१।१९) इति।

करुणावरुणालयस्य भगवत एषा कृपैव तस्य "पोषणशक्तिः" इति वैष्णवानां स्वीकृतः कल्पोऽत्रापि संगच्छते। तन्निदर्शनरूपेण किञ्चिदुल्लिख्यते-

पापीयान् कश्चिदजामिलनामा दासीपतिर्दुष्कर्मनिरतो द्विजः, स्वमरणसमये भीत्या स्वीयं नारायणनामानं कनिष्ठं प्रियं च पुत्रं 'नारायण' इत्याजुहाव। तेन साङ्केत्येनैव भगवन्नामोच्चारणेन तस्य सद्गतिः सञ्जाता। इदं भगवतः पोषणशक्तेरेव माहात्म्यम् (श्रीमद्भा०६/३/४०)।

वृत्रासुरकथा, तत्कृता भगवत्स्तुतिश्चापि सम्यग्रूपेण श्रीहरेरनुग्रहमूलकतां समुद्घाटयति। दिङ्मात्रमत्रोदाह्रियते –

न नाकपृष्ठं न च पारमेष्ठ्यं न सार्वभौमं न रसाधिपत्यम्।

न योगसिद्धीरपुनर्भवं वा समञ्जस त्वा विरहय्य काङ्क्षे ॥

अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः।

प्रियं प्रियेव व्युषितं विषण्णा मनोरविन्दाक्ष दिदृक्षते त्वाम् ॥ (श्रीमद्भा० ६।११।२५-२६)

स्कन्धेऽस्मिन्नूनविंश अध्यायाः भगवन्नामरूपाचर्चासम्बन्धेन त्रिधा विभज्यन्ते, यथाहि –

प्रथमादारभ्य तृतीयपर्यन्तम्- 'नाम' माहात्म्यम्।

चतुर्थादारभ्य द्वादशपर्यन्तम्- 'रूप' माहात्म्यम्।

त्रयोदशादारभ्योनविंशपर्यन्तम्-अर्चापद्धतिर्माहात्म्यश्चेति पोषणाभिधानस्य चतुर्थलक्षणस्य षष्ठस्कन्धे सङ्गतिः समुपकल्पनीया।

सप्तमः स्कन्धः (ऊतिस्कन्धः)

'ऊति'शब्देन जीवस्य वासना गृह्यते। एतस्या अपरमभिधानमविद्येति तत्त्वविद्भिः कथ्यते। सेयमविद्या पञ्चपर्वा - अविद्याऽस्मितारागद्वेषाभिनिवेशरूपा चेति। एतानि पञ्च पर्वाणि "पञ्चपर्वात्मिकयाविद्ययैव" निहन्यन्ते, अथ च विद्याऽपि पञ्चपर्वा - विद्यातपोवैराग्याराधनातत्त्वज्ञानरूपेति।

विद्या

तपः

वैराग्यम्

आराधना

तत्त्वज्ञानम्,

श्रीमद्भागवतस्यास्मिन् स्कन्धे १५ अध्यायाः सन्ति।। ये खलु त्रेधा विभज्यन्ते। पञ्च क्रमेण इमे पञ्चपर्वाऽविद्यायाः सात्त्विकराजसतामसविभागेन त्रिधा विभक्तपञ्चपर्वाणि खण्डयन्तीति स्वाम्यखण्डानन्दयतिवराणां मतम् (अखण्डानन्द, सन् १९७१, पृ. १३८)।

अस्मन्मतेऽन्यत्प्रकारेणापि विभाजनमिदं स्वीकृत्य किमपि विवेचयितुं शक्यते यत् सप्तमस्कन्धस्य प्रथमादारभ्य पञ्चमपर्यन्ताः पञ्च अध्याया अविद्यायाः पञ्चपर्वाणां निदर्शनरूपेणोपन्यस्ताः, यथा-

प्रथमेऽध्याये - नारदयुधिष्ठिरसंवादात्मके जयविजयादिभगवत्पार्षदानां कथाप्रसङ्गे एतयोर्हृदि अविद्याऽभिधं प्रथमं पर्व समुदेति, येन तौ सनकादिशापाद् भगवद्धामवैकुण्ठात् परिभ्रष्टो, हिरण्याक्षहिरण्यकशिपुनामानौ दैत्यौ सम्भवतः। जीवस्याप्येवं गतिः। अविद्योदयरूपशापादेवायं भगवत्पार्थक्यमवाप्नोतीति कथाया निष्यन्दभूतोऽर्थः।

द्वितीयेऽध्याये- हिरण्यकशिपुः, हिरण्याक्षवधपर्याकुलान् स्वपरिवारजनान् विविधाभिर्धर्मोपदेशकथाभिः परितोषयति, परं स्वयं तु न शान्तिमवाप्नोति, न धर्मकथानुसारमाचरणं करोति। तस्याहङ्कृतिस्तं लोकपीडकरूपेणोपकल्पयति। अनेनास्मितारूपं द्वितीयं पर्व समाम्नातम्।

तृतीये- तपसा वरप्रातिप्रसङ्गेन तृतीयस्य रागपर्वणो व्याख्या भवति।

चतुर्थे - हिरण्यकशिपोरत्याचारम्, अविद्याया द्वेषरूपं घटकं प्रमाणयति।

अनन्तरं पञ्चमेऽध्याये, अभिनिवेशपर्ववशमुपगतः स (हिरण्यकशिपुः) स्वीयसिद्धान्तस्याननुकूलम् ऋजुकं स्वतनयं प्रह्लादमपि हन्तुमुद्यतो भवतीति पञ्चस्वध्यायेषु पञ्चपर्वाऽविद्या व्याख्यायते। एवम्, अग्रिमेषु पञ्चसु (६ अध्यायादारभ्य दशमपर्यन्तेषु) पञ्चपर्वयाऽविद्यया एतन्निराक्रियते, तद्यथा –

षष्ठेऽध्याये - प्रह्लादद्वारा असुरबालकेषु विद्योपदेशः(श्रीमद्भा० ७।६।२१) एतेनाविद्याया निरसनं भवति।

सप्तमे - मातुर्गर्भे स्थितस्य प्रह्लादस्य कृच्छ्रसाध्यावस्थायां देवर्षिनारदमुखादुपदेशश्रवणरूपं तपः, एतेन 'अस्मिता' परिहर्तुं शक्या।

अष्टमे चाध्याये - श्रीनृसिंहाद् हिरण्यकशिपुवधवर्णनेन 'सर्वमपीह नश्वरमनित्यञ्चेत्येवंरूपो वैराग्यः। अनेन रागो नश्यति।

नवमेऽपि - प्रह्लादकृतायां भगवत्स्तुतौ भगवदाराधनानिरूपणेन द्वेषो निरस्यते।

दशमेऽध्याये - प्रह्लादनृसिहसंवादेन प्रह्लादद्वारा तत्त्वज्ञानोपलब्धिः साङ्केत्येन वर्णिता ययाऽभिनिवेशो निवर्त्यत इति। अन्तिमे चाध्यायपञ्चके (११-१५) स्त्रीपुंधर्मवर्णनव्याजेन जीवस्य स्वाभाविकी वासनैव विधिनिषेधपद्धत्या निराकृतेति। स्कन्धोऽयमपि नितरामन्वर्थतां भजते।

अष्टमः स्कन्धः (मन्वन्तर कथास्कन्धः)

अस्मिन् मन्वन्तरस्कन्धे आरम्भादेव प्रथमेऽध्याये स्वायम्भुवादिमन्वन्तरचतुष्टयवर्णनम्, पञ्चमेऽध्याये रैवतचाक्षुषमन्वन्तरवर्णनम्, त्रयोदशे भविष्यन्मन्वन्तरसप्तकवर्णनं चतुर्दशे च मन्वादीनां पृथक् पृथक् कर्मनिरूपणमित्यादिप्रकटपद्धत्या मन्वन्तराणि समुपवर्णितानि। अन्येष्वध्यायेष्वपि "मन्वन्तराणि सद्धर्म" इति लक्षणोक्त्या सद्धर्मप्रतिपादकानां भगवतो यज्ञाजितमोहिनीवामनमत्स्यादि-"मन्वन्तरावताराणां गाथाः, गजेन्द्रमोक्षादि-भगवद्धर्मप्रतिपादकोपाख्यानानि, अन्यच्चापरधर्मतत्त्वानि व्याख्यातानि।

नवमः स्कन्धः (ईशानुकथास्कन्धः)

नवमस्कन्धे चतुर्विंशत्यध्यायाः। येषु द्वादशाध्यायेषु सूर्यप्रधानतयाऽन्येषु च सोमप्रधानतया भगवदवतारकुलवर्णनमस्ति। उदयेनैव तिमिरशैत्यजडत्वनिरसनात् कष्टनिवृत्तिरूपसुखप्रदानाच्च सूर्यस्य गरिमा निषेधमुखः। अत एतदन्वयसम्भूतस्य श्रीरामस्य चरितमपि रावणादिलोककण्टकनिरसनरूपप्रजा-रक्षणप्रामुख्येणैवोपवर्णितमिति निदर्शिनीभूतं तत्रैव, यथा-

"खलदवदहनः कोसलेन्द्रोऽवतान्नः (श्रीमद्भा० ९।१०।४)

चन्द्रे तु प्राधान्येनाह्लादकत्वमेव। तिमिरापनोदनादिकं सर्वमानुषङ्गिकमित्येतद्वंशोत्पन्नश्रीकृष्णस्य चरितमपि भूभारहरणादिकार्यापेक्षया ब्रजवल्लवीजनानन्दनिष्यन्दप्रेमाभक्तेरेव प्राधान्यमावहतीति द्वादशाध्यायेषु चन्द्रवंशोद्भवराज्ञां चरितनिरूपणाद् व्यज्यते।

अपि च, चतुर्विंशत्यध्यायेषु चतुर्विंशतीति संख्यया एतत्संख्याकभगवदवताराणामपि बोधो भवति, येन 'ईशानुकथा' नितरामत्र संगच्छते।

दशमस्कन्धः (निरोधस्कन्धः)

भागवतमतानुसारेणास्याविद्याचक्रस्य वास्तविकं पर्यवसानं भगवत्कथाश्रवणमननानुध्यानजन्यभगवदनुरागेणैव सम्भवति। भगवत उत्तमश्लोकस्य गुणानुवादमेव भवरोगस्य परमं महौषधम्, तदपि मधुरं श्रोतृमनोऽभिराम-मात्मारामजनगीतञ्चेति। यथा-

निवृत्ततर्षैरुपगीयमानाद् भवौषधाच्छोत्रमनोऽभिरामात्।

क उत्तमश्लोकगुणानुवादात् पुमान् विरज्येत विना पशुघ्नात्॥ इति। (श्रीमद्भा. १०।१।४)

अत एव सम्यग्रूपेण एतेनैव (भगवत्कथापीयूषपानेन) प्रपञ्चस्य निरोधः। यथा- जीवस्यात्मरूपेण जाग्रत्स्वप्नसुषुप्त्यादिविरहिते तुरीये परमात्मनि सन्निवेश्य सिद्ध्यति। एक एव भगवान् नामरूपलीलाधामात्मकश्चतुर्धा भक्तजनकल्याणायाविर्भवति। अत्रापि पश्चायुगवर्तिजनानां कृते तल्लीलाकथैवावलम्बनं मुक्तेः साधनं च भवति। अतः प्रत्नाचार्यैर्दशमस्कन्धे मुख्यतया इयं लीलैव निरोधपदेन स्वीक्रियते (वल्लभाचार्य, सन् १९११, पृ. २)। आनुषङ्गिकतया धर्मग्लापकानामसुराणां लोकप्रपीडकानां दुष्टनरेशानां भगवत्कर्तृकवधोऽपि 'निरोध'पदेन स्वीक्रियते, यतः-

नैमित्तिको निरोधोऽन्यो धर्मग्लानिनिमित्ततः।

..............................हरिणा दुष्टभूभुजाम् (वल्लभाचार्य, सन् १९११, पृ. १०३)॥

इत्यस्मिन् श्लोके महाप्रभुवल्लभाचार्या भगवतो भूभारहरणात्मकानि कर्माणि नैमित्तिकनिरोधपदवाच्यानीति स्वीकुर्वन्ति। एतदपि लक्षणमत्र भगवत्कृतपूतनाबकप्रलम्बधेनुकचाणूरमुष्टिकादिदैत्यानां कंसकालयवन-शिशुपालदन्तवक्रजरासन्धनरकादिदुष्टनरेशानां च संहारेण सङ्गच्छते। अतो निरोधलक्षणलक्षितोऽयं स्कन्धो नितरामन्वर्थ एव।

एकादशः स्कन्धः (मुक्तिस्कन्धः)

मुक्तेस्तात्पर्यमस्ति यद्भेदरूपनानात्वं परित्यज्य जीवः स्वस्वरूपे आत्मन्येव सुदृढां निष्ठां विदधातु। सज्ज्ञानेन, आत्मनः संसारबन्धनम्, देहाध्यासादिप्रपञ्चं समाधिगम्यम्, सर्वमेनं निवर्तयित्वा जगतश्च मित्थ्यारूपं मनसि विभाव्य, निष्कले ब्रह्मण्येव रन्तुमिच्छेदिति स्कन्धेस्मिन् एतत्साधनीभूतानि तत्त्वान्याख्यातानि, यथा-

सुदेवाय देवर्षिनारदस्योपदेशः - द्वितीयेऽध्याये।

मायायास्ततः सन्तरणोपायस्य च वर्णनम्, ब्रह्मकर्मादिनिरूपणश्च - तृतीयेऽध्याये।

श्रीकृष्णोद्धवसंवादे - अवधूतोपाख्यानम् - ६, ७, ८, ९ अध्यायेषु।

आत्मनः संसारबन्धनम्, बद्धमुक्तयोश्च साधूनां लक्षणकथनम्, भक्तिप्राप्त्युपाय- वर्णनश्चेति (१०-११)।

भगवतो हंसरूपेण ब्रह्मणे ज्ञानोपदेशादयश्च।

द्वादशः स्कन्धः (आश्रयस्कन्धः)

एतस्मिन् द्वादशतमे स्कन्धे आभासनिरोधयोः परमाश्रयस्य भगवतः स्वरूपत्तत्त्वमेव समुद्घाटितं भागवतकारेण। अतो विविक्तरूपेण आभासनिरोधावत्र विविच्येते, यथा-

आभासः- एकस्मिन्नेव तत्त्वात्मके सुवर्णे कटककुण्डलमुकुटनूपुरादिनानाऽऽकारकल्पितान्याभूषणानि तत्त्वदृष्ट्या स्वर्णात्मिकान्यपि, व्यवहारदृष्ट्या पृथक् पृथङ्नामानि पृथक् पृथगवयवभाञ्जि च भवन्ति; तथैव एकस्मिन्नेवाद्वये ब्रह्मणि देवासुरमनुष्यतिर्यञ्चां समुत्पत्तिप्रतीतिः त्रिगुणात्मवैविध्यदर्शनं चात्र नानात्वमुद्भासयति, विधिनिषेधमूलकान् नानाधर्माचारान् च प्रकटयति, तदयमेवाभास इति कथ्यते।

निरोधः - यथाऽग्निमध्ये परिगलितरूपेण सर्वाण्याभूषणानि, स्वस्वनामरूपाणि सुवर्णत्वमेवाधिगच्छन्ति, तद्वत्सृष्टेर्नानात्वमपि ज्ञानाग्निसंदग्धीभूय निष्कलब्रह्मण्येवावतिष्ठत इत्येव 'निरोध' पदवाच्यो भवति। इदानीमाश्रयतत्त्वस्य व्याख्या विधीयते। तद्यथा-

आश्रयः - आश्रयशब्दस्यापरपर्यायः 'शरणम्' इति भवति। स्वस्वरूपलाभार्थकोपजीव्यत्वमाश्रयत्वम् (वल्लभाचार्य, सन् १९११, पृ. १०४)। पूर्वोक्तानां सर्गादिनवलक्षणानां यच्छरणं यदधिष्ठानम्, तदेवाश्रयपदवाच्यं परब्रह्मेति। अयमाश्रयोऽपि द्विधा भवति (१) साधनाश्रयः (२) फलाश्रयश्चेति।

यथा - विदेशात् स्वगृहं गन्तुकामः कश्चिद् जनो गृहमेव फलाश्रयं विजानन् साधनाश्रयत्वेन 'यात्रायानोपस्करपाथेयप्रभृतीनपि गृह्णाति, तद्वत् फलाश्रयत्वेन केवलं ब्रह्मैव परिकल्पयन् भागवतकारः साधनाश्रयत्वेन नानाधर्मार्थकथानिरूपणमत्र करोति। वस्तुतः सर्गादिनवलक्षणलक्षितो ब्रह्मात्मरूपः श्रीकृष्ण एवात्र दशमपदार्थः। स्कन्धेऽस्मिन्नेतस्यैव शुद्धिः क्रियते। शुद्धेस्तात्पर्यमस्ति विविक्तरूपेण तत्त्वस्यानुसन्धानम्। ब्रह्मणि मायासंयोगात् समुत्पन्ना प्रपञ्चकल्पनैवाशुद्धिः, शुद्धिस्तु तस्मिन्नद्वयरूपेण तत्त्वान्वेषणमिति। यथा जातरूपे विविधरूपजातान्याभूषणानि, आभूषणधिया धारयन्ती काचिद्रमणी तेषु, तत्तदङ्गधारणक्रिययोत्कृष्टापकृष्टात्मिकां बुद्धिं कुरुते; परं सुवर्णैकदृष्टिः कश्चित् स्वर्णकारस्तानि सर्वाण्यपि सुवर्णरूपेणैव गृह्णाति। एवमत्रापि प्रपञ्चासक्तचेता जनो गुणदोषबुद्ध्या हेयोपादेयरूपेणैव सृष्टिं विजानाति, कश्चिद्योगी एवास्यां मूलतत्त्वं ज्ञातुं प्रयतते। स्कन्धेऽस्मिन्निदमेवाश्रयतत्त्वं त्रयोदशाध्यायेषु विविधधिया विततं दृश्यते। तत्सूत्रपद्धत्याऽत्र निर्दिश्यते, यथा-

प्रथमेऽध्याये कलियुगीयराजवंशवर्णनद्वारेण सम्पूर्णलोकस्य देशस्य चाश्रयत्वेन भगवानेवेति व्यज्यते।

द्वितीये - कलिकृतयुगयोः परस्परविपरीतयोर्युगधर्माणामाश्रयरूपेण भगवानेवास्तीति।

तृतीये-हरेर्नाम स्वमहिम्ना कलियुगीयजनानां हिताय भगवदाश्रयत्वेनैव तिष्ठतीति कथितम्।

चतुर्थे - चतुर्विधप्रलयनिरूपणेन, लयेऽपि भगवत्तत्त्वं मुखरितमिति व्यक्तम्।

पञ्चमे - भगवन्तमाश्रयरूपेण विज्ञाय नरः सर्वविधभयेन मुच्यत इति सूचितम्।

षष्ठेऽध्याये - जीवने मरणे, संग्रहविभागे, सर्वत्र भगवत्तैव कथाभिः कलिता। एवं सप्तमाष्टमनवमदशमाध्येष्वपि विश्वाश्रयत्वेन मायाऽऽश्रयत्वेन च भगवच्छक्तिरेव व्यापृतेति निश्चीयते।

एकादशे - प्रतीकाश्रयकालविभागाश्रयरूपेण (सूर्यव्यूहरूपेण) च श्रीभगवानेवेति निगदितम्।

द्वादशे त्रयोदशतमे च - श्रीमद्भागवतस्य सम्पूर्णासु कथासु सर्वेषु पुराणेष्वपि च हरिरेवाश्रयधिया समुपवर्णित इति। सम्पूर्णेऽस्मिन् स्कन्धे 'आश्रय' तत्त्वस्य व्याख्यानेनाश्रयरूपमस्याभिधानं सुसङ्गतमेव।

उपसंहारः

अस्य सुविस्तृतसमालोचनस्य तात्पर्यमिदमेवास्ति यच्छ्रीमद्भागवतम्, (महर्षिकृष्ण- द्वैपायनस्य) अन्यत्सप्तदशपुराणविशिष्टम्, अन्यदेव दशलक्षणलक्षितं महापुराणमस्ति। एतस्य लक्षणान्येतस्मिन् समीचीनरूपेण

संगच्छन्ते। लक्षणविन्यासेनैव श्रीमद्भागवतस्य एतादृक् स्वरूपं सिद्धयति, यस्मिन्नेकोऽपि श्लोकः, एकमपि वाक्यं त्यक्तुं परिवर्तयितुं वा न शक्यते।

एतस्मादेव कारणाद् विगतपञ्चसहस्रवर्षेष्वप्येतस्मिन् किमपि खण्डनं समुपबृंहणं वा न जातमिति पौरस्त्यपण्डितानां निश्चितं मतम्। प्रबन्धेऽस्मिन्नस्माभिः प्रत्नपण्डितानामेव पद्धतिः पुरस्कृता, यतस्तद्विना ग्रन्थस्यास्य तात्त्विकं स्वरूपं समुद्धाटयितुं न शक्यते। अर्वाञ्चस्त्वत्र भौतिकीं दृष्टिमवलम्ब्य केवलमस्य परमरसरूपस्य श्रीमद्भागवतस्यापि निर्माणादिविषयिणीं समालोचनामेव वितन्वन्ति। फलतः कृतश्रमा अपि तेऽत्र कमपि लाभं न प्राप्नुवन्ति। श्रीमद्भागवतोक्त्या श्रद्धाविरहितानामेतेषां श्रमोऽपि निस्तण्डुलतुषावघातश्रमसदृशं क्लेशमूलकतामेवाश्रयते, यथा –

श्रेयः श्रुतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये।
तेषामसौ क्लेशत एव शिष्यते नान्यद् यथा स्थूलतुषावघातिनाम्॥ इति। *(श्रीमद्भा० १०।१४।४)*

श्रीमद्भागवते ये भागवतधर्माः समुपवर्णितास्ते सार्वजनीनाः सार्वदेशीयाः, किन्तु श्रद्धयैकगम्याः सन्ति। अत्र तर्कोऽप्रतिष्ठः सिद्धयति। श्रद्धयैव एतद्रहस्यं वेत्तुं शक्यते। एतावता भागवतप्रोक्तपुराणलक्षणस्य भागवते सङ्गतिर्दृश्यत इति स्पष्टीभवति।

सन्दर्भग्रन्थसूची

अक्षयकुमारबन्द्योपाध्याय. (सन्१९१६). *महर्षि कृष्णद्वैपायन और भागवतधर्म*. कल्याण।

अखण्डानन्द. (सन् १९७१). *मानवजीवनऔर भागवत धर्म*. बम्बई: सत्साहित्यप्रकाशन ट्रष्ट।

बलदेवोपाध्याय. (२०२१). *पुराणविमर्श*. वाराणसी: चौखम्बा सुरभारती प्रकाशन।

वल्लभाचार्य. (सन् १९११). *सुबोधिनी* (भागवतटीका). वाराणसी: चोखम्बा संस्कृत सीरिज।

वेदव्यास. (२०५८). *श्रीमद्भागवतम्*. गोरखपुर: गोविन्दभवन कार्यालय,गीताप्रेस गोरखपुर।

वेदव्यासः (वि.सं.२०५१) *महाभारत* (षष्ठसंस्करणम्) गोरखपुर : गीताप्रेस।

वेदव्यासः (वि.सं.२०५५) *देवीभागवतमहापुराणम्* (सप्तमसंस्करणम्) गोरखपुर : गीताप्रेस।

वेदव्यासः (वि.सं.२०४१) *श्रीविष्णुपुराणम्* (नवमसंस्करणम्) गोरखपुर : गीताप्रेस।

वेदव्यासः (वि.सं.२०५८) *श्रीमद्भगवद्गीता* (द्वादशसंस्करणम्) गोरखपुर : गीताप्रेस।

वेदव्यासः (सन्.२००२) *श्रीनारदीयमहापुराणम्*, (तृतीयसंस्करणम्) दिल्ली : नागप्रकाशन।